# Lesson 19: Exercise Pages 244 - 253

1. महोदधौ मथ्यमाने[मथ् PrPP 7/1] तु धूमेन अर्चिर्भिः[3/+] च मिश्रिताः वाताः सर्पस्य मुखात् निर्गम्य विद्युत्-[TP3]समुपेताः मेघाः सम्भूय श्रम-[TP6]संताप-[TP3]परिश्रान्तान् देवान् अभ्यवर्षन् ।

   Now while the great ocean was being churned, mixed with smoke and flames, the winds, having come forth from the head of the snake, having become clouds endowed with lightning, rained upon the devas fatigued by the pain of fatigue.

---

2. देव-[&]असुरैः भ्राम्यमानेन[भ्रम् PrPP 3/1] गिरिणा विनिष्पिष्टाः बहवः जलचराः पञ्चत्वं गताः ।

   Crushed to bits by the mountain being turned by the devas and asuras, many fish went to destruction.

---

3. अपि च गिरेः शिखराद् विहगैः विहग-[TP3]कृत-[KD]नीडैः च सह महान्तः[1//+] वृक्षाः समुद्रस्य जले न्यपतन् ।

   Moreover from the peak of the mountain great trees with birds and bird-made nests fell in the water of the ocean.

---

4. परस्परं संघर्षणात् ते वृक्षाः मुहुर्मुहुः प्रज्वलन्तः[प्र-ज्वल् 1P PrAP 1/+] सर्वाणि पर्वत-[TP7]वासीनि सत्त्वानि अदहन् ।

   Due to rubbing against each other the trees repeatedly bursting into flames burned the creatures dwelling on the mountain.

---

5. जले निपतितेभ्यः द्रुमेभ्यः निर्गताः नानाविधाः निर्यासाः महोदधौ च देवैः विष्णोः आदेशेन पूर्वं निक्षिप्तानां ओषधीनां विविधाः रसाः समुद्रस्य अम्भसि[7/1] समस्रवन् ।

   From the trees fallen in the water, varied resins come out, and the varied juices of the plants thrown in the ocean by the devas before by the command of Viṣṇu flowed together in the water of the ocean.

---

6. सर्वैः तैः रसैः निर्यासैः च तस्य सागरस्य उदकं प्रथमं पयः[1/1] एव संभूय[सम्-भू ger] ततः घृतं संभूतम् ।

   By all the juices and resins the water of the ocean first having become milk alone, then became ghee.

---

7. परन्तु यत् अमृतं देव-असुरैः इष्टं तत् न उदभवत् ।

   But the amṛta desired by the devas and asuras did not arise.

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

8. अमृतस्य लाभस्य आशां त्यजन्तः[त्यज् 1P PrAP 1/+] देवाः विष्णुं शरणं पुनः प्रापद्यन्त ।
Abandoning the hope of the gain of amṛta, the devas again sought Viṣṇu as refuge.

---

9. तेषां श्रमं विषादं च अवलोक्य महेश्वरः इदं वचनं अवदत् ।
Having seen their fatigue and sorrow the great lord said these words.

---

10. भवद्भ्यः[4/+] हे देवाः अधिकं बलं दास्यामि[दा P fut I/1] ।
“I will give more strength to you, O devas!

---

11. महत्तरेण यत्नेन महागिरिं परिवर्तयेध्वम्[परि-वृत् 1A c-opt II/+] ।
With greater effort you should turn the great mountain.”

---

12. इति उक्ताः विष्णुना अधिक-[KD]बलेन युक्ताः च देवाः दैत्य-[&]दानवैः सहिताः मन्दर-[KD]पर्वतं परिवर्तयितुं पुनः आरब्धाः ।
Thus told and endowed with more strength by Viṣṇu the devas together with the daityas and dānavas again began to turn the Mandara mountain.

---

13. तदनन्तरं सागरात् शीत-[BV6]अंशुः सोमः समुत्पन्नः ।
Thereupon from the ocean the moon having cool rays arose.

---

14. ततः देवी श्रीः[1/1] पाण्डुर-[TP2]वासिनी घृतात् उद्गता ।
Thereafter the goddess Śrī wearing white came out of the ghee.

---

15. सुरा देवी अपि श्वेतः उच्चैःश्रवाः[1/1] तुरगः च ततः विष्णोः दिव्यः मणिः कौस्तुभं समुदपद्यन्त ।
The goddess Surā also and the white horse Uccaiḥśravas, then Kaustubha the heavenly jewel of Viṣṇu arose.

---

16. यत्र देवाः अतिष्ठन् तत्र वासुकेः पुच्छ-[TP6]समीपं सोमः श्रीः सुराः देवी तुरगः च अगच्छन् ।
Where the devas stood there to the vicinity of the tail of Vāsuki the moon, Śrī, the goddess Surā, and the horse went.

---

17. श्रीः विष्णोः भार्या अभवत् ।
Śrī became the wife of Viṣṇu.

---

18. कौस्तुभं विष्णोः उरसि[7/1] गतम् ।
Kaustubha went the the chest of Viṣṇu.

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

19. अन्ततः धन्वन्तरि-[BV6]नामा[1/1] देवः श्वेतं अमृत-[TP3]संपूर्णं कमण्डलुं हस्तेन धारयन्[धृ 10U PrAP 1/1] समुद्रात् उत्थितः ।

Finally a deva having the name Dhanvantari carrying a white pitcher filled with amṛta with his hand stood up from the ocean.

---

20. अमृतं दृष्टवा एव असुरैः महान्तं[2/1] नादं मम[6/1] इदं इति मुक्त्वा अमृत-[TP3]संपूर्ण-[KD]कमण्डलुः धन्वन्तरेः हस्तात् गृहीतः ।

Having merely seen the amṛta, having let out a great roar ‘It is mine!’ the pitcher filled with amṛta was taken from the hand of Dhanvantari by the asuras.

---

21. तस्मिन् एव क्षणे विष्णुः स्व-[TP6]मायया अतीव सुन्दर्याः अप्सरसः[6/1] रुपं कृत्वा तस्याः चित्त-[TP2]हारिणा[3/1] वपुषा[3/1] असुरान् अमोहयत् ।

At that very moment Viṣṇu with his magic having made the form of a very beautiful apsaras deluded the asuras with her heart-seizing body.

---

22. तस्याः अप्सरसः[6/1] वपुषा वशीकृत-[BV6]मनसः[1/+] असुराः तस्यै अमृतं मोहेन अयच्छन् ।

Having minds controlled by the body of the apsaras, the asuras gave her the amṛta due to delusion.

---

23. तदा अप्सरसः[6/1] हस्तात् अमृतं प्राप्य विष्णुना देवेभ्यः समर्पितं देव-गणाः च झटिति तत् ईप्सितं अमृतं अपिबन् ।

Then having acquired the amṛta from the hand of the apsaras it was offered to the devas by Viṣṇu, and the groups of devas instantly drank the desired amṛta.

---

24. अमृतं पिबत्सु[पा 1P PrAP 7/+] देवेषु राहु-[BV6]नामा[1/1] दानवः अपि देवस्य रुपं कृत्वा चन्द्रमसं[2/1] सूर्यं च वर्जयित्वा अन्यैः अदृष्टः अमृतं अपिबत् ।

The devas drinking the amṛta, a dānava having the name Rāhu also having made a form of a deva, unseen by an other having excluded the moon and sun, drank the amṛta.

---

25. तस्य राहोः कण्ठं अनुप्राप्ते अमृते तदा देवानां हित-[TP6]काम्यया चन्द्रमसा[3/1] सूर्येण च आख्यातम् ।

The amṛta having reached the throat of Rāhu, then it was told by the moon and sun with the desire for welfare of the devas.

---

26. तत् श्रुत्वा एव अमृतं पिबतः[पा 1P PrAP 6/1] तस्य दानवस्य शिरः[2/1] विष्णुना चक्रेण अवच्छिन्नम् ।

Having merely heard that, the head of the dānava drinking the amṛta was cut off by Viṣṇu with a discus.

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

27. परन्तु तस्य राहोः शिरः पृथिवी-[TP6]तलं निपत्य पीतस्य अमृतस्य प्रभावेन अमरत्वं गतम् ।
But the head of Rāhu having fallen to the surface of the earth, it went to immortality by the power of the drunken amṛta.

---

28. ततः चन्द्रमसे[4/1] सूर्याय च क्रुद्धेन[क्रुध् PPP 3/1] राहुणा शाश्वतं वैरं द्वन्द्वेन सह कृतं अद्य अपि च चन्द्रमसं[2/1] सूर्यं च गगने ग्रसते ।
Thereafter by Rāhu, angered at the moon and sun, an eternal hostility was made with the pair and even today he swallows the moon and sun in the sky.

---

29. तस्मिन् एव काले अम्भसः[6/1] समीपे दानवानां देवानां च अतिमहान् संग्रामः प्रवृत्तः ।
At that very time in the vicinity of the water a very great battle of the dānavas and devas commenced.

---

30. अस्मिन् महति[7/1] युद्धे विष्णुना असुराः रुधिर-[TP3]अवलिप्त-[BV3]अंगाः बलवता[3/1] सुदर्शन-[BV6]नाम्ना[3/1] चक्रेण सहस्रशः निहताः ।
In this great war the asuras, having limbs anointed with blood, were killed in the thousands by Viṣṇu with the strong discus having the name Sudarśana.

---

31. पराजिताः केचिद् असुराः सागरं केचित् तु महीं प्रविष्टाः ।
Defeated, some asuras entered the ocean, and some the earth.

---

32. ततः विजयं अवाप्य देवाः मन्दर-[KD]पर्वतं स्वं एव देशं गमयित्वा तं मुदित-[KD]आत्मना[3/1] अपूजयन् ।
Thereafter having gained victory, the devas having caused the Mandara mountain to go to its own place, worshipped it with glad spirit.

---

## English to Sanskrit

1. देवासुरैर् महोदधौ मथ्यमाने पर्वतस्य शिखरात् प्रभूता वृक्षा जले न्यपतन् ।

---

2. अपि च तेभ्यो द्रुमेभ्यो निर्गता निर्यासा महोदधौ पूर्वं देवैर् निक्षिप्तैर् ओषधिभिः सह मिश्रिताः ।

---

3. इदं सर्वं समुद्रजले स्रवत् प्रथमं पयस् ततो घृतं संभूतम् ।

---

4. यदा देवदैत्यदानवैर् इष्टं अमृतं न समुत्पन्नं तदा देवा विषादं गत्वामृतलाभस्याशां त्यजन्तो विष्णुसमीपं उपकारार्थं पुनर् अगच्छन् ।

---

5. विष्णोर् अधिकबलं लब्ध्वा देवा महत्तरेण प्रयत्नेनासुरैः सहिता मन्दरपर्वतं पुनः पर्यवर्तयन् ।

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

6. तदनन्तरं विविधानि द्रव्याणि शनैः शनैर् घृतसमुद्रात् समुत्पन्नानि ।

---

7. अन्ततो देवभिषग् धन्वन्तरिर् अमृतसंपूर्णकमण्डलुं हस्तेन धारयन् महोदधेर् उत्थितः ।

---

8. देवेष्व् अमृतं पिबत्सु राहुनामा दानवो देवस्य रूपं कृत्वा चन्द्रं सूर्यं च वर्जयित्वान्यैर् देवैर् अदृष्टोऽमृतं अपिबत् ।

---

9. तस्मिन् एव क्षणे सूर्येण चन्द्रेण च इदं अर्थं अधिकृत्य निवेदितेन विष्णुना सुदर्शननाम्ना चेक्रेण राहोः शिरोऽवच्छिन्नम् ।

---

10. किन्तु यस्मात् कारणात् राहुणा पीतं एवामृतं तस्य कण्ठं अनुप्राप्तं तस्मात् तस्य शिरोऽमरणत्वं गतम् ।

---

11. ततः सूर्याय चन्द्राय च क्रोधेन राहुर् द्वन्द्वेन सह शाश्वतं वैरं अकरोत् अद्यापि च गगने सूर्यं चन्द्रं च ग्रसते ।

---

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, aor = aorist, ger = gerund, inf = infinitive, denom = denominative, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva